मो षु वरुण मृन्मयं गृहं राजन्न् अहं गमम् ।
मृळा सुक्षत्र मृळय ॥ ७-०८९-०१
यद् एमि प्रस्फुरन्न् इव दृतिर् न ध्मातो अद्रिवः ।
मृळा सुक्षत्र मृळय ॥ ७-०८९-०२
क्रत्वः समह दीनता प्रतीपं जगमा शुचे ।
मृळा सुक्षत्र मृळय ॥ ७-०८९-०३
अपाम् मध्ये तस्थिवा्लतसं तृष्णाविदज् जरितारम् ।
मृळा सुक्षत्र मृळय ॥ ७-०८९-०४
यत् किं चेदं वरुण दैव्ये जने ऽभिद्रोहम् मनुष्याश् चरामसि ।
अचित्ती यत् तव धर्मा युयोपिम मा नस् तस्माद् एनसो देव रीरिषः ॥ ७-०८९-०५